INSTITUT FÜR KULTUR- UND GEISTESGESCHICHTE ASIENS
DER ÖSTERREICHISCHEN AKADEMIE DER WISSENSCHAFTEN

INSTITUT FÜR INDOLOGIE DER UNIVERSITÄT WIEN

# WIENER ZEITSCHRIFT
FÜR DIE
# KUNDE SÜDASIENS
UND
ARCHIV FÜR INDISCHE PHILOSOPHIE

Herausgegeben von

ROQUE MESQUITA und CHLODWIG H. WERBA

Band XXXVIII
1994

Sonderdruck

VERLAG
DER ÖSTERREICHISCHEN AKADEMIE DER WISSENSCHAFTEN
WIEN 1994

# QUOTATIONS IN MALAYAGIRI'S COMMENTARY ON THE NANDISŪTRA

*By Muni Jambūvijaya, Bhavnagar/Gujarat*

१

## श्रीशङ्खेश्वरपार्श्वनाथाय नमः ।

## श्री सद्गुरुभ्यो नमः ।

**जैनागमस्य नन्दिसूत्रस्य** आचार्यश्री **मलयगिरि**सूरिविरचितायां **वृत्तौ** उद्धृतानां दार्शनिकानां पाठानां

## मूलस्थानानि

जैनागमग्रन्थेषु चतुर्विधा ग्रन्था उपलभ्यन्ते–द्रव्यानुयोगविषयकाः १, गणितानुयोगविषयकाः २, चरणकरणानुयोगविषयकाः ३, धर्मकथानुयोगविषयकाश्चेति ४ । श्वेताम्बरजैनाभिमता **आयारो**(आचारः) १, **सूयगडो**(सूत्रकृतम्) २, **ठाणं**(स्थानम्) ३, **समवाओ**(समवायः) ४, **वियाहपण्णत्ती**(व्याख्याप्रज्ञप्तिः) ५, इत्यादयः ४५ पञ्चचत्वारिंशत् आगमाः सुप्रसिद्धाः । एते च सर्वेऽपि **अर्धमागध्यां** भाषायां निबद्धाः । एतेषु केचिद् भगवतो **महावीर**स्य समये केचिच्च तदनन्तरनिकटसमये विरचिताः ।

विस्तरेण एतेषामागमानामर्थपरिज्ञानाय तदुत्तरकालीनैर्विभिन्नैराचार्यैः **निर्युक्ति-भाष्य-चूर्णि**रूपाः व्याख्याग्रन्था विरचिताः । एते च सर्वेऽपि प्राकृतभाषायामेव सन्ति ।

ततः परं संस्कृतभाषाया यदा अधिकतरं प्राधान्यं जातं तदा संस्कृतभाषायामपि विभिन्नैराचार्यैर्**वृत्तयो** विरचयांचक्रिरे । किन्तु सर्दत्र मूला- गमविषयस्यैव प्राधान्यम् । दार्शनिकी चर्चा वैरल्येनैव (Hardly) तत्र दृश्यते ।

इदं तु आश्चर्यरूपम्– जैनागमेषु **नन्दिसूत्रे** 'मतिज्ञानम् १, श्रुतज्ञानम् २, अवधिज्ञानम् ३, मनःपर्यायज्ञानम् ४, केवलज्ञानम् ५' इति ज्ञानपञ्चकस्य विस्तरेण वर्णनमुपलभ्यते । अस्य **जिनदासगणि**महत्तरविरचिता **चूर्णिः** आचार्यश्री**हरिभद्रसूरि**विरचिता **वृत्तिः**, आचार्यश्री**मलयगिरिसूरि**विरचिता **वृत्तिश्च** इति प्राचीनं व्याख्यात्रयमुपलभ्यते । आचार्यश्री **मलयगिरि**सूरिर्वैक्रमे द्वादशे शतक आसीत् । तेन विरचितायां **वृत्तौ** ज्ञानवर्णनस्य मुख्यत्वेऽपि महता

१.इयं वृत्तिः आगमोदयसमित्या (SURAT) ईसवीये 1973 A.D. वर्षे प्रकाशिता ।

२

विस्तरेण दार्शनिकी चर्चा अपि दृश्यते । अस्यां चर्चायां प्रसङ्गमासाद्य अनेकेभ्यो ग्रन्थेभ्यः पाठा उद्धृताः । बौद्धाचार्येण **प्रज्ञाकरगुप्तेन** विरचितः **धर्मकीर्तिविरचितप्रमाणवार्तिकस्य भाष्य**रूपतया अलङ्कारभूतः **वार्तिकालङ्कारः**[1] अत्र बहुश उपयुक्तः । एते सर्वेऽपि पाठा मूलस्थानेन[2] सह अत्रोपदर्श्यन्ते —

[नन्दिसूत्रस्य मलयगिरिविरचिताया **वृत्तेः** अत्र **नं० म०** इति संकेतः, **पं०** इति पंक्तेः संकेतः, **पृ०** इति पृष्ठस्य (Page) संकेतः, **श्लो०** इति श्लोकस्य संकेतः, A=Recto, B=Verso]

**नं० म०** पृ० ३A, उक्तं च– ''यः कर्ता कर्मभेदानां भोक्ता कर्मफलस्य च । संसर्ता परिनिर्वाता स ह्यात्मा नान्यलक्षणः ॥ [**शा**[3]**स्त्रवार्तासमुच्चये** श्लो० ९०]

नं० म० पृ ३B, आह च **प्रज्ञाकरगुप्तो**ऽपि– ''रूपान्तरेण यदि तत् तदेवास्तीति मा रटीः । चैतन्यादन्यरूपस्य भावे तद् विद्यते कथम् ? ॥ [**वार्तिकालङ्कारे** पृ० १२८ श्लो० ६९२]

अत्र **वार्तिकालङ्कारे** 'विज्ञानादन्यरूपस्य' इति पाठः ।

**नं० म०** पृ० ४A, उक्तं च– ''काठिन्याबोधरूपाणि भूतान्यध्यक्षसिद्धितः । चेतना च न तद्रूपा सा कथं तत्फलं भवेत् ॥ [**शास्त्रवार्तासमुच्चये** श्लो० ४३]

**नं० म०** पृ० ४B, तदुक्तम्– ''अन्तराभवदेहोऽपि सूक्ष्मत्वान्नोपलभ्यते ।

---

१.अयं वार्तिकालङ्कारः **'प्रमाणवार्तिकभाष्यम्'** इति नाम्ना Kashi Prasad Jayaswal Research Institute, Patna इत्यत इसवीये 1953 वर्षे पण्डित राहुल **सां**कृत्यायनेन प्रकाशितः।

नन्दीसूत्रस्य मलयगिरिसूरिविरचितायां वृत्तौ उद्धृताः पाठा वार्तिकालङ्कारस्य संशोधनेऽपि भृशमुपयोगिनो भविष्यन्ति इति विदांकुर्वन्तु सज्जनाः ।

**वाराणसीस्थेन** षड्दर्शनप्रकाशनसंस्थानेन [स्वामियोगीन्द्रानन्देन संपादितो हिन्दीभाषायामनूदितश्च] अयं ग्रन्थः सम्प्रति प्रकाशयितुमारब्धोऽस्ति, तस्य च प्रथमो भागः प्रकाशितोऽप्यस्ति सम्प्रति 1991 A.D.वर्षे। २. मूलस्थानानां गवेषणाय अस्माभिर्बहु प्रयतितम्, यानि यानि स्थानानि लब्धानि तानि [ ] एतादृशे चतुरस्रे कोष्ठके दर्शितानि, यत्र मूलस्थानं न लब्धं तत्र कोष्ठकं रिक्तं स्थापितम् । ३. आचार्यश्री**ह**रिभद्रसूरिविरचितः शास्त्रवार्तासमुच्चयः **गोडीजी जैन** उपाश्रय Bombay इत्यादितः प्रकाशितः ॥

३

निष्क्रामन् प्रविशन् वापि नाभावोऽनीक्षणादपि ॥" [**वार्तिकालङ्कारे** पृ० ८९श्लो०५१२]

अत्र प्रमाणवार्तिकालङ्कारे 'स्वच्छत्वान्नोपलभ्यते' इति पाठो मुद्रितः, किन्तु सः अशुद्ध एव।

**नं० म०** पृ० ४B, उक्तं च– "शरीराग्रहरूपस्य चेतसः सम्भवो यदा। जन्मादौ देहिनां दृष्टः किं न जन्मान्तरागतिः ॥" [वार्तिकालङ्कारे पृ० ७२ श्लो० ४५३]

अत्र **वार्तिकालङ्कारे** 'किं न देहान्तरागतिः' इति पाठ उपलभ्यते।

**नं० म०** पृ० ५A, आह च– "अनुमेयेऽस्ति नाध्यक्षमिति कैवात्र दुष्टता। अध्यक्षस्यानुमान्रस्य विषयो विषयो नहि ॥ [**वार्तिकालङ्कारे** पृ० ७२ श्लो० ४५४]

**नं० म०** पृ० ५A, उक्तं च– "आग्रहस्तावदभ्यासात् प्रवृत्त उपलभ्यते। अन्यत्राध्यक्षतः साक्षात् ततो देहेऽनुमा न किम् ? ॥" [**वार्तिकालङ्कारे** पृ० ७२ श्लो० ४५५]

अत्र **वार्तिकालङ्कारे** 'शरीरेऽन्यत्र वाध्यक्षात् तत एवानुमा न किम्' इति पाठ उत्तरार्धे उपलभ्यते।

**नं० म०** पृ० ५ B, उक्तं च– "अक्षव्यापारमाश्रित्य भवदक्षजमिष्यते। तद्व्यापारो न तत्रेति कथमक्षभवं भवेत् ॥" [**वार्तिकालङ्कारे** पृ० ६५ श्लो० ४२४]

**नं० म०** पृ० ६A, आह च–"चेतयन्तो न दृश्यन्ते केश-श्मश्रु-नखादयः। ततस्तेभ्यो मनोज्ञानं भवतीत्यतिसाहसम् ॥" [**वार्तिकालङ्कारे** पृ० ६५ श्लो० ४२५]

अत्र वार्तिकालङ्कारे 'यदा केश-नखादयः। तदा तेभ्यो मनोज्ञानं भवतीति कथं स्थितिः।' इति पाठः ॥

**नं० म०** पृ० ६B, "तेषां समत्वमारोग्यं क्षय-वृद्धी विपर्यये[1] [वार्तिकालङ्कारे पृ० ७४ पं० १०]

१. 'विपर्यय इति वचनात्' इति पाठो वार्तिकालङ्कारे नं० म० मध्ये च वर्तते, अतो 'विपर्यये' इति 'विपर्ययः' इति चोभयथापि पाठोऽत्र संभवति ॥

४

**नं० म०** पृ० ७ A, आह च– ''दोषस्योपशमेऽप्यस्ति मरणं कस्यचित् पुनः । जीवनं दोषदुष्टत्वेऽप्येतन्न स्याद् भवन्मते ॥'' [**वार्तिकालङ्कारे** पृ० ७४ श्लो० ४६५]

अत्र **वार्तिकालङ्कारे** 'स्याद् व्यवस्थितम्' इति पाठः ।

**नं० म०** पृ० ८ A, उक्तं च–''अविकृत्य हि यद् वस्तु यः पदार्थो विकार्यते । उपादानं न तत् तस्य युक्तं गो-गवयादिवत् ॥'' [प्रमाणवार्तिके[1] १।६३]

**नं० म०** पृ० ९ A, तदुक्तमन्यैरपि–''ज्ञापकत्वाद्धि सम्बन्धः स्वात्मज्ञानमपेक्षते । तेनासौ विद्यमानोऽपि नागृहीतः प्रकाशकः ॥'' [**मीमांसाश्लोकवार्तिके** सम्बन्धाक्षेपपरिहारे श्लो० ३२]

**नं० म०** पृ० १२ A, तदाह–''वक्तुरभिप्रेतं तु सूचयेयुः'' [ ]

तुलना–''नान्तरीयकताऽभावाच्छब्दानां वस्तुभिः सह । नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचकाः ॥'' – प्रमाणवार्तिके ३।२१२।

यथोक्तम्- ''वक्तुरभिप्रायं सूचयेयुः शब्दाः''–**मोक्षाकरगुप्तविरचिता तर्कभाषा**।

**नं० म०** पृ० १५ B, आह च–''ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा ॥'' [**विष्णुपुराणे** ६।५।७४]

**नं० म०** पृ० १६ A, उक्तं च स्तुतिकारेण– ''सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तसम्पदः । तवैव ताः पूर्वमहार्णवोत्थिता जगत्प्रमाणं जिनवाक्यविप्रुषः ॥ [**सिद्धसेनदिवाकरविरचितायां द्वात्रिंशिकायाम्** १।३०]

**नं० म०** पृ० १६A, ''सदकारणवन्नित्यम्'' [**वैशेषिकसूत्रे** ४।१।१]

**नं० म०** पृ० १६A, यदाह **धर्मकीर्तिः**–''अपेक्षाया विशेषप्रतिलम्भलक्षणत्वात् ।'' [ ]

**नं० म०** पृ० १७A, तथा च तद्ग्रन्थः–''ऋग्गिरावृचश्चक्रुः, सामानि सामगिरौ'' [ ]

---

१. प्रमाणवार्तिकस्य चतुर्णां परिच्छेदानां क्रमद्वयं वर्तते प्रमाणसिद्धिः १, प्रत्यक्षम् २, स्वार्थानुमानम् ३, परार्थानुमानम् ४ इत्येकः क्रमः । स्वार्थानुमानम् १, प्रमाणसिद्धिः २, प्रत्यक्षम् ३, परार्थानुमानम् ४ इत्यपरः क्रमः । तत्र प्रथमं क्रममाश्रित्य प्रमाणवार्तिककारिकाणां क्रमाङ्कोऽत्रास्माभिर्निर्दिष्टः- प्रथमोऽङ्कः परिच्छेदसूचकः, द्वितीयोऽङ्कः कारिकासूचकः ॥

**नं० म०** पृ० १९A, उक्तं च–"स्वयं रागादिमान् नार्थं वेति वेदस्य नान्यतः । न वेदयति वेदोऽपि वेदार्थस्य कुतो गतिः ॥ तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ । खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा ॥" [प्रमाणवार्तिके ३।३१७-३१८]

**नं० म०** पृ० २०A, उक्तं च–"स्वर्गोर्वश्यादिशब्दश्च दृष्टोऽरूढार्थवाचकः । शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना ॥" [प्रमाणवार्तिके ३।३२०]

**नं० म०** पृ० २०B, उक्तं च–"ब्रह्मणोऽपत्यतामात्राद् ब्राह्मण्येऽतिप्रसज्यते । न कश्चिदब्रह्मतनोरुत्पन्नः क्वचिदिष्यते ॥" [वार्तिकालङ्कारे पृ० ११ श्लो० ६७]

**नं० म०** पृ० २१A, आह च–"शिष्टैः परिगृहीतत्वाच्चेदन्योन्यसमाश्रयः । वेदार्थाचरणाच्छिष्टास्तदाचाराच्च स प्रमा ॥" [वार्तिकालङ्कारे (?) पृ० १०] । तुलना–"सर्वागमसमानत्वाद् यागाद्यर्थक्रियात्मनः । न सर्वैः करणं तस्य तुल्यं वेदेऽपि किं न तत् ॥५७॥ न चेदादृतता शिष्टैरित्यन्योन्यसमाश्रयः । वेदार्थाचरणाच्छिष्टास्तदाचाराच्च स प्रमा ॥५८॥" [वार्तिकालङ्कारे पृ० १०]

**नं० म०** पृ० २१B, उक्तं च–"तीर्थप्रवर्तनफलं यत् प्रोक्तं तीर्थकरनाम । तस्योदयात् कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्तयति ॥ तत्स्वाभाव्यादेव प्रकाशयति भास्करो यथा लोकम् । तीर्थप्रवर्तनाय प्रवर्तते तीर्थकर एवम् ॥" [तत्त्वार्थकारिका ९, १०]

**नं० म०** पृ० २२A, "न सत्ता सदन्तरमुपैति" [ ] इति वचनात् ॥

**नं० म०** पृ० २२A, उक्तं च–"अविकलकारणमेकं तदपरभावे यदा भवन्न भवेत् । भवति विरोधः स तयोः शीत-हुताश्मनोर्दृष्टः ॥ [वार्तिकालंकारे पृ० २३३ श्लो० २७६]

अत्र **वार्तिकालंकारे** 'यदपरभावे' इति पाठः ।

**नं० म०** पृ० २२A, आह च **प्रज्ञाकरगुप्तः**–"बाध्यबाधकभावः कः स्यातां यद्युक्तिसंविदौ । तादृशोऽनुपलब्धेश्चेदुच्यतां सैव साधनम् ॥ अनिश्चयकरं

६

प्रोक्तमीदृक्षानुपलम्भनम् । तन्नात्यन्तपरोक्षेषु सदसत्ताविनिश्चयौ ॥'' [प्रमाणवार्तिके २।९४-९५]

वस्तुत इदं श्लोकद्वयं धर्मकीर्तिना विरचिते प्रमाणवार्तिके वर्तते । 'प्रज्ञाकरगुप्त'नाम्ना कथं निर्दिष्टं मलयगिरिसूरिभिरिति न ज्ञायते ॥

नं० म० पृ० २३A, उक्तं चान्यैरपि–''न चास्पष्टावभासित्वादेव शब्दः प्रवर्तते । प्रत्यक्षदृष्टे स्तम्भादावपि शब्दप्रवर्तनात् ॥ अयं स्तम्भ इति प्राप्तमन्यथाऽस्याऽप्रवर्तनम् । न चास्पष्टावभासित्वमत्र ज्ञानस्य लक्ष्यते ॥ तथान्यत्रापि शब्दानां प्रवृत्तिर्न विरुध्यते ।'' [वार्तिकालंकारे पृ० ११७ श्लो० ६३१-६३३]

''उक्तं च–''सर्वासववविकल्पस्य नास्त्यध्यक्षाद् विवेकिता । न चास्पष्टावभासित्वादेव शब्दः प्रवर्तते ॥६३१॥ ... ...६३२॥ ... ...प्रवृत्तिर्न निवार्यते ॥६३३॥'' इत्येवं वार्तिकालङ्कारे श्लोकत्रयमत्र दृश्यते ॥

नं० म० पृ० २४B, उक्तं च–''प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते । वस्त्वसत्तावबोधार्थं तत्राभावप्रमाणता ॥'' [मीमांसाश्लोकवार्तिके, अभावनिरूपणे]

अत्र मीमांसाश्लोकवार्तिके 'वस्तुसत्तावबोधार्थम्' इति पाठः ॥

नं० म० पृ० २४B, आह च–''अशुच्यादिरसास्वादप्रसङ्गश्चानिवारितः ॥३५९॥'' [वार्तिकालङ्कारे पृ० ५० श्लो० ३५९]

अत्र वार्तिकालङ्कारे 'स्वादसङ्गमश्चानिवारितः' इति पाठः ॥

नं० म० पृ० २५A, उक्तं च–''क्रमेण वेदनं कथम्'' [ ] तुलना–''क्रमेण वेदनेऽनादिवस्तुनो वेदनं कथम्'' [वार्तिकालङ्कारे पृ० ३३० श्लो० ५७८]

नं० म० पृ० २५B, यदुच्यते भट्टेन–''सर्वज्ञोऽसाविति ह्येतत् तत्कालेऽपि बुभुत्सुभिः । तज्ज्ञान ज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥'' [मीमांसाश्लोकवार्तिके सूत्र २, श्लो० १३४]

भट्टोऽयं कुमारिलभट्टः ।

नं० म० पृ० २५B, आह च–''एकदेशपरिज्ञानं कस्य नाम न विद्यते । न

७

ह्येकं नास्ति सत्यार्थं पुरुषे बहुजल्पिनि ॥'' [वार्तिकालङ्कारे पृ० ५१, श्लो० ३६७]

अत्र वार्तिकालङ्कारे 'बहुकल्पके' इति पाठः ।

नं० म० पृ० २६B, उक्तं च-''शास्त्राद्यभ्यासतः शास्त्रप्रभृत्येवावगच्छतः । साकल्यवेदनं तस्य कुत एवागमिष्यति ॥'' [वार्तिकालङ्कारे पृ० ५१, श्लो० ३६३]

अत्र वार्तिकालङ्कारे 'प्रभृत्येवावगच्छतु' इति पाठः ॥

नं० म० पृ० २७B, उक्तं च-''गरुत्मच्छाखामृगयोर्लङ्घनाभ्याससम्भवे । समानेऽपि समानत्वं लङ्घनस्य न विद्यते ॥'' [वार्तिकालङ्कारे पृ०१०७, श्लो० ५८६]

अत्र वार्तिकालङ्कारे 'भ्याससंगमे' इति पाठः ।

नं० म० पृ० २७B, उक्तं च-''स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया । चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥'' [ ]

नं० म० पृ० २८A, उक्तं च-''न चागमेन यदसौ विध्यादि- प्रतिपादकः । अप्रत्यक्षत्वतो नैवोपमानस्यापि संभवः ॥'' [शास्त्रवार्तासमुच्चये श्लो० ५८२]

'नैवोपमानेनापि गम्यते' इति शास्त्रवार्तासमुच्चये पाठः ॥

नं० म० पृ० २८B, ''विरुद्धोऽसति बाधके'' [ ] इति वचनात् ।

नं० म० पृ० २९A, आह च प्रज्ञाकरगुप्तोऽपि-''यदि विशेषविरुद्धतया क्षतिर्ननु न हेतुरिहास्ति न दूषितः । निखिलहेतुपराक्रमरोधिनी न हि न सा सकलेन विरुद्धता ॥'' [वार्तिकालङ्कारे पृ० ३८६ श्लो० ९४९]

नं० म० पृ० २९B, उक्तं च-''तटस्थत्वेन वेद्यत्वे तत्त्वेनावेदनं भवेत् । तदात्मना तु वेद्यत्वेऽशुच्यास्वादः प्रसज्यते ॥'' [वार्तिकालङ्कारे पृ० ३३० श्लो० ५७२]

वार्तिकालङ्कारे 'रागितैव प्रसज्यते' इति पाठः ॥

नं० म० पृ० २९B, तथा चायमर्थोऽन्यैरप्युक्तः-''यथा सकलशास्त्रार्थः स्वभ्यस्तः प्रतिभासते । मनस्येकक्षणेनैव तथानन्तादिवेदनम् ॥'' [वार्तिकालङ्कारे पृ० ३३० श्लो० ५७९]

८

**नं० म०** पृ० ३०A, आह च–"अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा । ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥" [वाक्यपदीये १।३८]

**नं० म०** पृ० ३०A, उक्तं च–"जैनेश्वरे हि वचसि प्रमासंवाद ईक्ष्यते। प्रमाणबाधा त्वन्येषामतो द्रष्टा जिनेश्वरः ॥ [ ]

तुलना–"ताथागते हि वचसि प्रमासंवाद ईक्ष्यते । प्रमाणबाधा त्वन्येषामतो द्रष्टा तथागतः ॥" [वार्तिकालङ्कारे पृ० ३२८ श्लो० ५३२]

**नं० म०** पृ० ३०A, तथा चोक्तम्–"समानविषया यस्माद् बाध्य-बाधकसंस्थितिः । अतीन्द्रिये च संसारिप्रमाणं न प्रवर्तते ॥ [वार्तिकालङ्कारे पृ० ३२८ श्लो० ५३३]

'बाधकतास्थितिः' इति वार्तिकालङ्कारे पाठः ।

**नं० म०** पृ० ३०B, आह च–"वीतरागस्य न सुखं योषिदालिङ्गनादिजम् । वीतद्वेषस्य च कुतः शत्रुसेनाविमर्दजम् ॥ वीतमोहस्य न सुखमात्मीयाभिनिवेशजम् । ततः किं तादृशा तेन कृत्यं मोक्षेण जन्मिनाम् ॥" [वार्तिकालङ्कारे पृ० ३२९ श्लो० ५६०-५६१]

अत्र वार्तिकालङ्कारे 'न वीतरागस्य' 'वीतद्वेषस्य तु' इति पाठः ।

**नं० म०** पृ० ३३B, उक्तं च–"रूपातिशयपाशेन विवशीकृतमानसाः । स्वां योषितं परित्यज्य रमन्ते योषिदन्तरे ॥" [वार्तिकालङ्कारे पृ० १२३ श्लो० ६५३]

अत्र वार्तिकालङ्कारे 'योषितं तिरस्कृत्य कामिनो' इति पाठः ।

**नं० म०** पृ० ३५B, आह च–"यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः । स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ॥ गुणदर्शी परितुष्यन् ममेति तत्साधनान्युपादत्ते । तेनात्माभिनिवेशो यावत् तावत् स संसारे ॥" [प्रमाणवार्तिके २।२१९-२२०]

**नं० म०** पृ० ३६B, उक्तं चान्यैरपि–"अवस्थिता हि वास्यन्ते भावा भावैरवस्थितैः ।" [मीमांसाश्लोकवार्तिके निरालम्बनवादे श्लो० १८५]

वार्तिकालङ्कारेऽपि उद्धृतमिदम् पृ० ३५८ श्लो० ६६३]

९

**नं० म०** पृ० ३६B, उक्तं च– वास्यवासकयोश्चैवमसाहित्यान्न वासना । पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तर:क्षण: ॥ [**मीमांसाश्लोकवार्तिके निरालम्बनवादे श्लो० १८२**]

**नं० म०** पृ० ३७A, २१५ A, "भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ।" [ ]

"क्षणिका: सर्वसंस्कारा अस्थिराणां कुत: क्रिया । भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ।"इति सम्पूर्णा कारिका।

**नं० म०** पृ० ३७B, "नाकारणं विषय: ।"[ ] इति वचनात्।

**नं० म०** पृ० ३७B, आह च भवदाचार्योऽपि **धर्मकीर्तिर्ज्ञाननयप्रस्थाने**–"सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत् । साम्ये केनचिदंशेन सर्वं सर्वस्य वेदनम् ॥" [**प्रमाणवार्तिके** २।४३५]

**नं० म०** पृ० ३८A, आह च प्रज्ञाकरगुप्त: –"वासनेति हि पूर्वविज्ञानजनितां शक्तिमामनन्ति वासनास्वरूपविद:" [**वार्तिकालङ्कारे** पृ० ३५६ पं० ६]

**नं० म०** पृ० ३९A, यदुच्यते **प्रज्ञाकरगुप्तेन** –"दीर्घकालसुखादृष्टाविच्छा तत्र कथं भवेत् ।" [**वार्तिकालङ्कारे** पृ० १५३ श्लो० ८३३]

'दृष्टेरिच्छा' इति वार्तिकालङ्कारे पाठ: ।

**नं० म०** पृ० ४०A, तथाहि–"शुद्धचैतन्यरूपोऽयं पुरुष: परमार्थत: । प्रकृत्यन्तरमज्ञात्वा मोहात् संसारमाश्रित: ॥" [**वार्तिकालङ्कारे** पृ० १५६ श्लो० ८४६]

'शुद्धबोधस्वभावोऽयं' इति **वार्तिकालङ्कारे** पाठ: ।

**नं० म०** पृ० ४०B, आह च–"अभिलाषस्मरणयो: प्रकृतैरेव वृत्तित: । अभिलाषाच्च तद्वृत्तिरित्यन्योन्यसमाश्रय: ॥" [**वार्तिकालङ्कारे** पृ० १५६ श्लो० ८५१]

**नं० म०** पृ० ६६B, उक्तं च–"मलविद्धमणिव्यक्तिर्यथाऽनेकप्रकारत: । कर्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारत: ॥" [**अकलङ्कविरचिते लघीयस्त्रये श्लो० ५७**]

१०

**नं० म०** पृ० ६६B, तथा चोक्तम्–''यथा जात्यस्य रत्नस्य निःशेषमलहानितः । स्फुटैकरूपाभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः ॥'' [ ]

**नं० म०** पृ० ७४B, अकलङ्कोऽप्याह–''द्विविधं प्रत्यक्षज्ञानम्– सांव्यवहारिकं मुख्यं च । तत्र सांव्यवहारिकमिन्द्रियानिन्द्रियप्रत्यक्षम्, मुख्यमतीन्द्रियज्ञानम् ।'' [लघीयस्त्रये[1] श्लो० ४ स्वोपज्ञविवृतौ]

**नं० म०** पृ० १३५A, तथा चोक्तम्–''नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।'' [प्रमाणवार्तिके[2] ३।३४]

**नं० म०** पृ० १६५A, यत उक्तम्–''अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम् ।'' [ ]

''नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्'' इत्युत्तरार्धम् ।

**नं० म०** पृ० १६५A, तथा चोक्तम्–''यः साध्यस्योपमाभूतः स दृष्टान्त इति कथ्यते ।'' [ ]

**नं० म०** पृ० १७१A, **शङ्करस्वामी** प्राह–

''अयस्कान्तोऽपि प्राप्यकारी, अयस्कान्तच्छायाणुभिः सह समाकृष्यमाणवस्तुनः सम्बन्धभावात्, केवलं ते छायाणवः सूक्ष्मत्वान्नोपलभ्यन्ते'' [ ]

**नं० म०** पृ० १७१B, तथा च तद्ग्रन्थः–''चक्षुः श्रोत्रं मनोऽप्राप्यकारि'' [ ]

**नं० म०** पृ० १७३A, ''रूपस्पर्शादिसन्निवेशो मूर्तिः'' [ ] इति वचनप्रामाण्यात् ।

**नं० म०** पृ० १७३B, उक्तं च–''यथा च प्रेर्यते तूलमाकाशे मातरिश्वना । तथा शब्दोऽपि किं वायोः प्रतीपं कोऽपि शब्दवित् ॥'' [**वार्तिकालङ्कारे** पृ० ५१२ श्लो० १२०]

**वार्तिकालङ्कारे** 'प्रतीपं शब्दवित् क्वचित्' इति पाठः ॥

---

१. ''प्रत्यक्षं विशदज्ञानं मुख्य-संव्यवहारतः ।'' इति कारिकायाः स्वोपज्ञविवृतौ पाठोऽयमर्थतो विद्यते ॥ २. ''अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ।'' इति उत्तरार्धम् ॥

**नं० म०** पृ० १९२A, "ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम्॥"

**नं० म०** पृ० १९२A, तथा चाह स्वयंभूः–"देवागमनभोयान-चामरादिविभूतयः । मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान् ॥" [**आप्तमीमांसा** श्लो० १]

**नं० म०** पृ० १९३A, "ऋषयः संयतात्मानः फलमूलानिलाशनाः । तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम् ॥ अतीतानागतान् भावान् वर्तमानांश्च भारत । ज्ञानालोकेन पश्यन्ति त्यक्तसङ्गा जितेन्द्रियाः ॥" [ ]

**नं० म०** पृ० २१३B, तथाचोक्तम्–

"न कालव्यतिरेकेण गर्भबालशुभादिकम् । यत् किंचिज्जायते लोके तदसौ कारणं किल ॥१॥

किं च कालादृते नैव मुद्गपक्तिरपीक्ष्यते । स्थाल्यादिसन्निधानेऽपि ततः कालादसौ मता ॥२॥

कालाभावे च गर्भादि सर्वं स्यादव्यवस्थया । परेष्टहेतुसद्भावमात्रादेव तदुद्भवात् ॥३॥

कालः पचति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः[1] ॥४॥" [ ]

**नं० म०** पृ० २१४A, "अन्यो(ज्ञो) जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव ॥" [**महाभारते वनपर्वणि** ३०।२८]

**नं० म०** पृ० २१४B, "नियतेनैव रूपेण सर्वे भावा भवन्ति यत् । ततो नियतिजा ह्येते तत्स्वरूपानुवेधतः ॥१॥

यद् यदैव यतो यावत् तत् तदैव ततस्तथा । नियतं जायते न्यायात् क एनां बाधितुं क्षमः ॥२॥" [**शास्त्रवार्तासमुच्चये** श्लो० १७३-१७४]

**नं० म०** पृ० २१८A, तथा चोक्तम्–"पूर्वकालादियोगी यः स पूर्वाद्यपदेशभाक् । पूर्वापरत्वं तस्यापि स्वरूपादेव नान्यतः ॥" [**वार्तिकालङ्कारे** पृ० ४७६ श्लो० ३०]

---

१. श्लोकचतुष्टयमिदं शास्त्रवार्तासमुच्चये दृश्यते, श्लो० १६५-१६८ ॥

१२

**नं० म०** पृ० २१८B, उक्तं च–"एकत्वव्यापितायां हि पूर्वादित्वं कथं भवेत् । सहचारिवशात् तच्चेदन्योन्याश्रयतागमः ॥ सहचारिणां हि पूर्वत्वं पूर्वकालसमागमात् । कालस्य पूर्वादित्वं च सहचार्यवियोगतः ॥"
[**वार्तिकालङ्कारे** पृ० ४७६ श्लो० ३१]

'नित्यत्वव्यापितायां.. सहचारितथात्वाच्चेद०' इति **वार्तिकालङ्कारे** पाठः ।

**नं० म०** पृ० २२०A, उक्तं च–"अशक्त्यान्येश्वराः पापप्रतिषेधं न कुर्वते । न त्वत्यन्तमशक्तेभ्यो व्यावृत्तमतिरिष्यते ॥ अथाप्यशक्त एवासौ तथा सति परिस्फुटम् । नेश्वरेण कृतं सर्वमिति वक्तव्यमुच्चकैः ॥ पापवत् स्वार्थकारित्वाद् धर्मादिरपि किं ततः ।" [**वार्तिकालङ्कारे** पृ० ३७ श्लो० २५७-२५८]

**वार्तिकालङ्कारे** 'अथाशक्त एवासौ तथा सति नेश्वरेण' इति खण्डितो गद्यरूपः पाठ उपलभ्यते ।

**नं० म०** पृ० २२०B, उक्तं च–"क्रीडार्था तस्य वृत्तिश्चेत् प्रेक्षापूर्वक्रिया कुतः । एकस्य क्षणिका तृप्तिरन्यः प्राणैर्वियुज्यते ॥" [**वार्तिकालङ्कारे** पृ० ३७ श्लो० २६१]

**नं० म०** पृ० २२०B, "इदमेवं न वेत्येतत् कस्य पर्यनुयोज्यताम् । अग्निर्दहति नाकाशं कोऽत्र पर्यनुयुज्यताम् ॥" [**वार्तिकालङ्कारे** पृ० ३५ श्लो० २४८]

'पर्यनुयोज्यताम्' इति **वार्तिकालङ्कारे** पाठः ।

**नं० म०** पृ० २२०B, "स्वभावेऽध्यक्षतः सिद्धे यदि पर्यनुयुज्यते । तत्रेदमुत्तरं वाच्यं न दृष्टेऽनुपपन्नता ॥"
[**वार्तिकालङ्कारे** पृ० ३५ श्लो० २४९]

'सिद्धे परैः पर्यनुयुज्यते इति **वार्तिकालङ्कारे** पाठः ।

**नं० म०** पृ० २२१A, उक्तं च–"यत् किंचिदात्माभिमतं विधाय निरुत्तरस्तत्र कृतः परेण । वस्तुस्वभावैरिति वाच्यमित्थं तदोत्तरं स्याद् विजयी समस्तः ॥"
[**वार्तिकालङ्कारे** पृ० ३५ पं० १४]

'०रिह वाच्यमित्थं तथोत्तरं' इति **वार्तिकालङ्कारे** पाठः । **श्लोकोऽयं भ्रान्त्या गद्यरूपेण वार्तिकालङ्कारेऽशुद्धः मुद्रितः ।**

१३

**नं० म०** पृ० २२१A, उक्तं च–"शास्त्रान्तराणि सर्वाणि यदीश्वरविकल्पत: । सत्यासत्योपदेशस्य प्रमाणं दानत: कथम् ॥" [**वार्तिकालङ्कारे** पृ० ३७ श्लो० २६२]

**नं० म०** पृ० २२१A, तथा चोक्तम्–"न न बाध्यत इत्येवमनुमानं प्रवर्तते । सम्बन्धदर्शनात् तस्य प्रवर्तनमिहेष्यते ॥" [**वार्तिकालङ्कारे** पृ० ४३ श्लो०९० ३२७]

'बाधत ... मितीरितम्' इति **वार्तिकालङ्कारे** पाठ: ।

**नं० म०** पृ० २२२A, यदुक्तम्–"नादृष्टपूर्वसर्पस्य रज्ज्वां सर्पमति: क्वचित् । तत: पूर्वानुसारित्वाद् भ्रान्तिरभ्रान्तिपूर्विका ॥" [**वार्तिकालङ्कारे** पृ० ३८४ श्लो० ९२६]

'पूर्वदृष्ट्यनुसारित्वान्न हेतुर्वासना कथम्' इति **वार्तिकालङ्कारे** पाठ: ।

**नं० म०** पृ० २२३A, उक्तं च–"हेतुताऽन्वयपूर्वेण व्यतिरेकेण सिध्यति । नित्यस्याव्यतिरेकस्य कुतो हेतुत्वसम्भव: ॥" [**वार्तिकालङ्कारे** पृ० ३३ श्लो० २२७]

'सम्बन्धोऽन्वय ... कुत: सम्बन्धसम्भव:' इति **वार्तिकालङ्कारे** पाठ: ।

**नं० म०** पृ० २२३A, "विशेषणं विना यस्मान्न तुल्यानां विशिष्टता ।" [**शास्त्रवार्तासमुच्चये** श्लो० ५४]

ईदृशा: स्तोका बहवो वा उद्धृता दार्शनिका: पाठा अनेकेषु जैनग्रन्थेषु उपलभ्यन्ते । तेषां गवेषणं परिशीलनं च विदुषामत्यन्तमुपयोगि आनन्दप्रदं च भविष्यतीत्याशास्ते–

पूज्यपादाचार्यदेवश्रीमद्विजय**सिद्धिसूरीश्वर**पट्टालंकार–
पूज्यपादाचार्यदेवश्रीमद्विजय**मेघसूरीश्वर**शिष्य–
पूज्यपादगुरुदेव मुनिराजश्री **भुवनविजयान्ते**वासी
मुनि **जम्बूविजय:**

P.O. **पंचासर**
(Via-विरमगाम)
गुजरात राज्य ,INDIA
PIN- 382 750

विक्रमसंवत् २०४९
चैत्री पूर्णिमा, ६-३-९३

| *pṛṣṭhe paṅktiḥ* | *śodhanīyaḥ pāṭhaḥ* | *śuddhaḥ pāṭhaḥ* |
|---|---|---|
| 1,17 | *mūlā-gama°* | *mūlāgama°* |
| 1,25 | *vṛttiḥ āgam°* | *vṛttir āgam°* |
| 2,26f. | *cayaḥ goḍījī°* | *°cayo goḍījī* |
| 3,4 | *saḥ aśuddha eva* | *so 'śuddha eva* |
| 4,6 | *pramāṇavārtike* 1/63 | *pramāṇavārttike* 1/61(= 63) |
| 4,12 | *pramāṇavārtike* 3/212 | *pramāṇavārttike* 3/213 |
| 4,27 | *prathamo 'ṅka* | *prathamo 'ṅkaḥ* |
| 5,1 | *veti* | *vetti* |
| 6,1–2 | *pramāṇavārtike* 2/94–95 | *pramāṇavārttike* 2/93–94 [*atra 'īdṛk kvānupalambhanam* \| *tatrātyanta°' iti pāṭhaḥ* \|] |
| 6,14 | *abhāvanirūpaṇe* | *abhāvaprāmāṇyavāde śl°* 1 |
| 6,18 | *svādasa°* | *rasaṃvādasa°* |
| 7,13 | *vidhyādi- pratipādakaḥ* | *vidhyādipratipādakaḥ* |
| 8,22–23 | *pramāṇavārtike* 2/219–220 | *pramāṇavārttike* 1/217–219 (= 219–221) [*atra 'tatrāham iti* ... \|\| ... *doṣāṃ sthirīkurute* \| ... *paritṛṣyan' iti pāṭhaḥ* \|] |
| 8,26 | *ślo°* 663 | *ślo°* 662 |
| 10,7 | 3/34 | 3/35 |
| 11,18 | *śvabhram eva* | *śvabhram eva vā* (*etasyā aṣṭādaśāyāḥ paṅkter adhastād idaṃ vākyam opyatām* \|) *atra mahābhārate* [*puṇyākhyapattanaprakāśita āraṇyakaparvaṇi* 31\|27] *'svargaṃ narakam eva ca* \|\|*' iti pāṭhaḥ* \| (*iti* \|) |
| 12,4 | *ślo°* 31 | *ślo°* 31–32 |
| 12,5 | *nityatvavyāpitāyāṃ* ... *saha°* | *nityatāvyāpitā yā* ... *kathaṃ tayoḥ* \| *saha°* |
| 12,15 | *na vety* | *na cety* |
| 12,24 | *paṃ°* 14 | *paṃ°* 14–16 |
| 13,25 | 2449 | 2049 |

# INHALT

Prastāvanā ... viii
Tabula gratulatoria ... ix
Verzeichnis der Schriften Gerhard Oberhammers ... xi

HARRY FALK: Die Kosmogonie von RV X 72 ... 1
HENK W. BODEWITZ: Life After Death in the Ṛgvedasaṃhitā ... 23
LAMBERT SCHMITHAUSEN: Zur Textgeschichte der *pañcāgnividyā* ... 43
JOACHIM FRIEDRICH SPROCKHOFF: Zur ‚Weihe' des Asketen. Eine Skizze ... 61
CLAUS OETKE: Die „unbeantworteten Fragen" und das Schweigen des Buddha ... 85
OSKAR VON HINÜBER: Die neun Aṅgas. Ein früher Versuch zur Einteilung buddhistischer Texte ... 121
TILMANN VETTER: Zwei schwierige Stellen im Mahānidānasutta. Zur Qualität der Überlieferung im Pāli-Kanon ... 137
ADELHEID METTE: *apratiṣṭhānam* – der äußerste Ort ... 161
MANFRED MAYRHYOFER: Zu Prakrit *māhaṇa-* ‚Brahmane' ... 169
ALBRECHT WEZLER: Once again on Patañjali's Definition of a Word (Studies in Patañjali's Mahābhāṣya V) ... 173
UTZ PODZEIT: Bemerkungen zum „Sinn" des Namens Vāsudeva . 191
GUDRUN BÜHNEMANN: Two Forms of Gaṇapati in the Indo-Tibetan Buddhist Tradition ... 201
MAX NIHOM: Sādhanamālā 256 – A Pāśupata-Bauddha Tantristic Sādhana ... 213
GEORGE CHEMPARATHY: Some Observations on Dayānanda Sarasvatī's Conception of the Veda ... 231
KAMIL V. ZVELEBIL: Kaṉaki Purāṇam – A Nineteenth Century Poetic Biography of a Ceylonese Devadāsī ... 251

## Archiv für indische Philosophie

SIEGFRIED LIENHARD: Amaru – erotisch und philosophierend ... 267
WALTER SLAJE: Die Angst der Yogis vor der Versenkung ... 273
ASKO PARPOLA: On the Formation of the Mīmāṃsā and the Problems Concerning Jaimini with particular reference to the teacher quotations and the Vedic schools (Part II) ... 293
JOHANNES BRONKHORST: The Qualities of Sāṅkhya ... 309

Inhalt


MINORU HARA: Pāśupata Studies II ........................ 323

ERNST PRETS: The Structure of *sādhana* in the Abhidharmasamuccaya ........................................ 337

MICHAEL TORSTEN MUCH: Uddyotakaras Kritik der *apoha*-Lehre (Nyāyavārttika *ad* NS II 2,66) ........................ 351

ELI FRANCO: *ālayavijñāna* and *kliṣṭamanas* in the Pramāṇavārttika? ........................................ 367

ERNST STEINKELLNER: Śākyabuddhi's Commentary on Pramāṇavārttika I 3 and its Vṛtti ........................ 379

Muni JAMBŪVIJAYA: Quotations in Malayagiri's Commentary on the Nandisūtra ........................................ 389

DAVID SEYFORT RUEGG: La notion du voyant et du «connaisseur suprême» et la question de l'autorité épistémique ......... 403

PIERRE-SYLVAIN FILLIOZAT: The Concept of *adhvan* in Śaivasiddhānta ........................................ 421

TEUN GOUDRIAAN: Rejection of Duality. On the Ātman Conception in the Viṣṇupurāṇa ........................ 435

ROQUE MESQUITA: Die Idee der Erlösung bei Kumārilabhaṭṭa ... 451

KIYOTAKA YOSHIMIZU: Der Geltungsbereich der vedischen Weisung (*niyoga*) bei den Prābhākaras ..................... 485

IRENE WICHER: *svargakāma* ........................... 509